International Journal of Sanskrit Research 2022; 8(1): 306-309

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2022; 8(1): 306-309
© 2022 IJSR
www.anantaajournal.com
Received: 30-11-2021
Accepted: 18-12-2021

रणजितकुमारबर्मन्
कुलसचिवः, केन्द्रीय संस्कृत विश्वविद्यालयः, सांस्थानिक क्षेत्रम्, जनकपुरी, नई दिल्ली, भारत

Corresponding Author:
रणजितकुमारबर्मन्
कुलसचिवः, केन्द्रीय संस्कृत विश्वविद्यालयः, सांस्थानिक क्षेत्रम्, जनकपुरी, नई दिल्ली, भारत

# मायाया एकत्वम्

रणजितकुमारबर्मन्

## प्रस्तावना

तदपि जीवसाक्षिवन्नाना किं वैकमित्यपेक्षायामाह – ''तच्चैकं तदुपाधिमायाया एकत्वात्'' जीवसाक्षिस्थले उपहितस्य चैतन्यस्याभेदेऽपि अन्तःकरणात्मकोपाधेर्भेदात् बहुत्वमङ्गीकरणीयम्। प्रकृते तु उपाधिभूतायाः मूलाविद्यात्मिकायाः मायायाः न भेदः यदधीना बहुत्वशङ्का स्यात्।
ननु मायायाः एकत्वं मायाभिर्शित श्रुतिविरुद्धमित्याशङ्क्याह – ''इन्द्रो मायाभिः पुरुरूप ईयते'' इत्यादिश्रुतौ मायाभिरिति बहुवचनस्य मायागतशक्तिविशेषाभिप्रायतया मायागत सत्त्वरजस्तमोरूपगुणाभि- प्रायतया वोपपत्तेः। अयंभावः सत्यपि मायायाः एकत्वे विभिन्नकार्यजननसामर्थ्यरूपस्य शक्तिविशेषस्य बहुत्वमङ्गीकरणीयमेव। अन्यथा कार्यगतवैचित्र्यानुपपत्तेः। तथा च तादृशशक्तिविशेषगतबहुत्वबोधनायैव 'मायाभिः' इत्यत्र श्रुतौ बहुवचनम् इति। अथवा सत्त्वरजस्तमसां, गुणानां साम्यं गतानामेव अपरं नाम 'माया' इति। तथा च मायायाः अवयवभूतेषु सत्त्वरजस्तमस्सु विद्यमानं यद्बहुत्वं, तद्बोधनायैव श्रुतौ 'मायाभिः' इत्यत्र बहुवचनप्रयोगः, न तु मायागतबहुत्वबोधनाय इति।
ननु किं नाम तत्प्रमाणं येन मायायाः एकत्वं निश्चीयते? इति जिज्ञासायामाह –

'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्'।[1]
अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजास्सृजमानां सरूपाः।
अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः॥[2]
'तरत्यविद्यां विततां हृदि यस्मिन्निवेशिते।
योगी मायाममेयाय तस्मै विद्यात्मने नमः॥

इत्यादि श्रुतिस्मृतिषु एकवचनबलेन लाघवानुगृहीतेन मायाया एकत्वं निश्चीयते।
मायामेव प्रकृतिं विद्यात्, मायिनमेव महेश्वरो जानीयात्। तथा च एकमज्ञानमेव भावात्मकं प्रकृतिशब्दवाच्यम्, न ततोऽतिरिक्तं किञ्चित् यथा साङ्ख्याभिमतम्। तादृशाज्ञानस्यैव मायाशब्दवाच्यत्वात् इत्यपि ध्वनितम्। नन्विदमेकवचनं जात्यभिप्रायकं किं न दित्याशङ्कचैतच्छङ्कानिवर्तकैकपदयुक्तां श्रुतिं पठति- अजामिति। जन्मशून्यामनादिभूतां स्वसमानजातीयेतरप्रकृतिशून्यामेकां लोहितशुक्लकृष्णां रजःसत्त्वतमोमयीं बह्वीः प्रजास्समानरूपास्त्रिगुणात्मिकाः सृजमानाम् एकोऽजन्मा जीवो जुषमाणः सेवमानोऽनुशेते तत्तादात्म्यापन्नो भवति जहात्येनां भुक्तभोगामजोऽन्य ईश्वर इत्यर्थः। मायाया एकत्वं श्रुतितात्पर्यसिद्धमिति कथं ज्ञातं श्रुतितात्पर्यस्य दुरूहत्वादित्याशङ्क्य स्मृतिकारानुसारेणेत्याशयेन पराशरस्मृतिं पठति तरतीति। यस्मिन् परात्मनि हृदि निवेशिते वृत्त्यारूढे कृते योगी अविद्यां तरति तस्मै ज्ञानस्वरूपायामेव वृत्त्यवच्छिन्नचैतन्यगोचराय नमः।

---

[1] श्वे. 4/90
[2] श्वे. 4/5

अविद्यां विशिनष्टि वितताममिति। प्रपञ्चाकारेण परिणतत्वात् सर्वत्र व्याप्तमित्यर्थः। सर्वानर्थभूताया मायाया स्वाश्रन्याव्यामोहकत्वव्यामोहकत्वविशेषेऽपि वस्तुतो नतयोर्भेदः। अतः तन्निवृत्तौ सर्वानर्थनिवृत्तिः। मायां, अविद्यां, इत्यत्र प्रकृतिभूतमायागतैकत्वप्रतिपादकैकामिति- प्रयोगदर्शनाच्च मायायाः एकत्वं श्रुतिसिद्धम्। न केवलं श्रुतिसिद्धमेव मायाया एकत्वम् अपि तु युक्तिसिद्धमपि। तथा हि – एकस्यामेव मायायां स्वीक्रियमाणायां सकलकार्यनिर्वाहे कृतं गौरवदूषितेन मायाबहुत्वेन इति। उपसंहरति – ''ततश्च तदुपहितं चैतन्यम् ईश्वरसाक्षि तच्चानादि तदुपाधेर्मायाया अनादित्वात्''।

मायोपहितं चैतन्यम् ईश्वरसाक्षि। उपधेयस्यानादित्वम् उपाधेश्च सादित्वमिति तूपलभ्यते, यथा कर्णशष्कुल्यवच्छिन्न-नभसः श्रोत्रत्वस्थले उपधेयस्य नभसः अनादित्वं उपाधिभूताया कर्णशष्कुल्याश्च सादित्वम्, परन्तु नात्र कोप्युपलभ्यते दृष्टान्तो यत् उपाधेरनादित्वे उपधेयस्य च सादित्वमिति। तथा च उपाध्युपधेययोः सत्यपि समसामयिकनियमे उपधेयस्य उपाधिकालान्यूनकालस्थितिकत्वमावश्यकम्। अतः अनादित्वमीश्वरसाक्षिणः इति।

ईश्वरस्वरूपम्

''मायावच्छिन्नं चैतन्यं परमेश्वरः, मायाया विशेषणत्वे ईश्वरत्वमुपाधित्वे साक्षित्वमिति ईश्वरत्वसाक्षित्वयोर्भेदः, न तु धर्मिणोरीश्वरतत्साक्षिणोः स च परमेश्वर एकोऽपि स्वोपाधिभूतमायानिष्ठ- सत्त्वरजस्तमोगुणभेदेन ब्रह्मविष्णुमहेश्वर इत्यादिशब्दवाच्यतां लभते''।

न च मायोपाधिकं चैतन्यं परमेश्वरः, येन परमेश्वरः तत्साक्षिणोः पृथङ्निर्देशानौचित्यशङ्का कस्यचित् स्यात्। वस्तुतः एकमेव चैतन्यं तत्र मायानिष्ठावच्छेदकतानिरूपितावच्छेद्यत्वस्य, मायानिष्ठोपाधितानिरूपितोपधेयत्वस्य च धर्मद्वयस्य स्वीकारात् ईश्वरत्वेश्वरसाक्षित्वयोरेव परस्परं भेदः, तादृग्धर्मद्वयमादायैव ईश्वरः, ईश्वरसाक्षि, इति पृथक्व्यपदेशः, इति नापसिद्धान्तः। जीवतत्साक्षिस्थले इयमेव रीतिरनुसरणीया। स्वस्य उपाधिभूता या माया, तन्निष्ठा ये सत्त्वरजस्तमोगुणाः तद्भेदेन ब्रह्मशब्दवाच्यतां विष्णुशब्दवाच्यतां महेश्वरशब्दवाच्यतां प्राप्नोति। एवं च एकस्मिन् एव परमेश्वरे मायागततत्तद्गुणदृष्टिमाश्रित्य ब्रह्मविष्ण्वादिव्यवहारः। चैतन्यावच्छेदकीभूतमायावयवगुणगतोत्कर्षं दृष्टिविषयीकृत्य यथा मायावच्छिन्नचैतन्ये ब्रह्मविष्ण्वादिव्यवहारः तथा चैतन्योपाधिभूतमायावयवगुण- गतोत्कर्षं दृष्टिमुपक्षिप्य ईश्वरसाक्षिण्यपि ब्रह्मविष्ण्वादिव्यवहारः इष्ट एव। अतएव न प्रकृते परमेश्वरोपाधिभूतेतिपदप्रयोगविरोधावकाशः।

ईश्वरतत्साक्ष्यनादित्वं समाक्षिपति

नन्वीश्वरसाक्षिणोऽनादित्वे ''तदैक्षत बहुस्यां प्रजायेय (6/6/2/1) इत्यादिना सृष्टिपूर्वसमये परमेश्वरस्यागन्तुकमीक्षणमुच्यमानं कथमुपपद्यते? उच्यते यथा विषयेन्द्रियसन्निकर्षादिकारणवशेन जीवोपाध्यन्तःकरणस्य वृत्तिभेदा जायन्ते, तथा सृज्यमानप्राणिकर्मवशेन परमेश्वरोपाधिभूतमायाया वृत्ति विशेषा इदमिदानीं स्रष्टव्यमिदमिदानीं पालयितव्यमिदमिदानीं संहर्तव्यमित्याद्याकारा जायन्ते। तासां च वृत्तीनां सादित्वात्तत्प्रतिबिम्बितं चैतन्यमपि सादीत्युच्यते।

अयमाशयः जीवसाक्षीश्वरसाक्षिभेदेन प्रत्यक्षं द्विविधमिति प्रतिपादितं पूर्वम्। तथा च साक्षित्वं प्रत्यक्षगतो धर्म इति प्रत्यक्षमेव साक्षीति फलितम्। तदैक्षत इति श्रुतौ ईक्षणं प्रत्यक्षरूपमेव वक्तव्यम्, भगवतः परोक्षज्ञानासम्भवात्। तदेव च प्रत्यक्षं ईश्वरसाक्षीति प्राप्तम्। उपाधिभूतायाः मायायाः अनादित्वात् यदि तस्यानादित्वमभ्युपेतं तदा प्रपञ्चव्याकरणपूर्व तत् सद्भूतं ब्रह्म ईक्षणं प्रत्यक्षं कृतवत् इत्यर्थकस्य तदैक्षत इति श्रुतेः कथं प्रामाण्यम्? अनादिकर्मकरणासम्भवात्। उक्तश्रुतेर्वा कथं साक्षिण अनादित्वाभ्युपगमसङ्गतिः? समाधत्ते – सत्यं तदैक्षत इति श्रुतिप्रतिपाद्यमीक्षणं प्रत्यक्षरूपतया साक्षिरूपमेव। साक्षिणश्च मायोपाधिक-नित्यचैतन्यरूपतया यदनादित्वं पूर्वमुक्तं तदपि स्थिरसत्यमेव। किन्तु ईक्षणं कृतवत् इत्यर्थिकायाः 'तदैक्षत' इति श्रुतेस्त्वितो नाप्रामाण्यं यतः सा 'ऐक्षत' इत्यनेन भूतस्य चैतन्यस्य न सादितां प्रतिपादयति, अपि तु उपाधिभूताया मायायाः तस्याः ये इदमिदानीं सृष्टव्यं इत्याद्याकारा परिणामप्रभेदाः तेषामेव सादिताम्। तथा चायं मायोपाधिकचैतन्यं साक्षीत्यस्य वृत्तिमन्मायोपाधिकचैतन्यं साक्षीत्यर्थः। तत्र वृत्तेः सादित्वे एव श्रुतिः तात्पर्यवती, न तु चैतन्यस्य सादित्वे। नातः श्रुतेरप्रामाण्यशङ्कापि ननु सृष्टिप्राक्काले सृष्टव्यपदार्थाभावेन 'इदमिदानीं सृष्टव्यम्' इत्याकारकवृत्तेः कथं सम्भवः, अविद्यमानपदार्थानाम् इदमोऽविषयत्वात्? उच्यते – न खलु वेदान्तसिद्धान्ते सृष्टिः अपूर्वोत्पत्तिरूपा, अपि तु अव्याकृतस्य व्याकरणं तथा च सूक्ष्मतयाऽवस्थितपदार्थमादाय तथावृत्त्युदये दोषाभावः इति।

उपसंहरतिः ''एवं साक्षिद्वैविध्येन प्रत्यक्षज्ञानद्वैविध्यम्। प्रत्यक्षत्वं च ज्ञेयगतं ज्ञप्तिगतं चेति निरूपितम्। तत्र ज्ञप्तिगतप्रत्यक्षत्वस्य सामान्यलक्षणं चित्तमेव''। एवं साक्षिद्वैविध्यप्रतिपादनान्तस्यैव तत्तद्वृत्त्यनुगतस्य ज्ञानत्वात्प्रत्यक्षज्ञानद्वैविध्यमपि सिद्धम्। एवं साक्षिद्वैविध्यनिरूपणाज्जीवेश्वरसाक्षिजन्यप्रत्यक्षभेदेन प्रत्यक्षज्ञानस्य द्वैविध्यं सिद्धं इति तु न रम्यम्। ज्ञप्तिगतं प्रत्यक्षत्वं चित्तमेवेत्युत्तरग्रन्थविरोधात्। ''यत्साक्षादपरोक्षाद्ब्रह्म'' इति श्रुत्या ब्रह्मैव ज्ञप्तिगत प्रत्यक्षमित्यनाविलम्। सच्चिदानन्दात्मके ब्रह्मणि चित्त्वं निराबाधमेवेति चित्तमेव ज्ञप्त्यात्मकप्रत्यक्षस्य सामान्यलक्षणमिति।

पर्वतो वह्निमानित्यनुमितौ प्रत्यक्षत्वस्य अतिव्याप्त्याशङ्कां निराकरोति – ''पर्वतो वह्निमानित्यादावपि वह्न्याद्याकारवृत्त्युपहितचैतन्यस्य स्वात्मांशे स्वप्रकाशतया प्रत्यक्षत्वात्। तत्तद्विषयांशप्रत्यक्षत्वं तु पूर्वोक्तमेव। तस्य च भ्रान्तिरूपप्रत्यक्षे नातिव्याप्तिः, भ्रमप्रमासाधारणप्रत्यक्षत्वसामान्यनिर्वचनेन तस्यापि लक्ष्यत्वात्''।

सर्वत्रापि तत्तदाकारवृत्त्युपहितचैतन्यस्य स्वात्मांशे प्रत्यक्षत्वेन सर्वस्यापि ज्ञानस्य लक्ष्यत्वात् पर्वतो वह्निमानित्याद्यनुमितौ नातिव्याप्तिरिति। पर्वतो वह्निमानितिवह्न्याद्याकारवृत्त्युपहितचैतन्यस्यापि ज्ञप्तिपदार्थतया लक्ष्यत्वेन तत्र चित्वात्मकलक्षणगमनं समुचितमेवेति सर्वथा दोषानवकाशः। 'यत्साक्षादपरोक्षाद् ब्रह्म' [3] इत्यादिश्रुत्या चित्तस्यैव प्रत्यक्षत्वाभिधानाच्चिद्रूपस्य ज्ञानस्य स्वात्मांशे स्वप्रकाशतया सर्वस्यापि ज्ञानस्य प्रत्यक्षत्वादित्यर्थः।

नन्वनुमित्यादौ कृतो नास्ति? उच्यते – न खल्वस्मन्मते विषयगतप्रत्यक्षत्वमिन्द्रियार्थसन्निकर्षजन्य ज्ञानविषयत्वम् अपितु प्रमात्रभेदः। स च प्रमातृसत्तातिरिक्तसत्ताकत्वाभावरूप इति। एवं च वृत्तेरपि

[3] बृ.उ. 3-4-1

स्वावच्छिन्नचैतन्य एवाध्यस्ततया पृथक्सत्तायाः अस्वीकारात् प्रमातृसत्तातिरिक्तसत्ताकत्वाभावस्य अनुमित्यात्मकवृत्तौ सत्त्वात् न विषयगतप्रत्यक्षत्वहानिः। वह्न्यनुमितिशब्दस्य वह्न्याकारवृत्त्यवच्छिन्न-चैतन्यमर्थः। तत्र चैतन्यांशे चित्त्वरूपं प्रत्यक्षत्वम्, वृत्त्यंशे प्रमातृसत्तातिरिक्तसत्ताकत्त्वाभावात्मकं प्रत्यक्षत्वम्। वह्न्यंशे च प्रमाणचैतन्यनिष्ठविषयचैतन्याभेदात्मकस्य "विषयांशे प्रत्यक्षत्वस्य" अभावेन परोक्षत्वमिति सर्वसामञ्जसम्। ननु चित्तमेव यदि प्रत्यक्षलक्षणं तदा भ्रान्त्यवच्छिन्नचैतन्येऽतिव्याप्तिः। चित्त्वस्य तत्रापि सत्त्वात् इत्याशङ्कामिष्टपत्या परिहरति- अयं भावः - चित्त्वमितिलक्षणं न चैतन्यविशेषस्य अपि तु चैतन्यसामान्यस्य। तथा च प्रमावच्छिन्नचैतन्यमिव भ्रान्त्यवच्छिन्नचैतन्यमपि लक्ष्यमेव। अतः तत्र लक्षणसमन्वयो युक्त एवेति नातिव्याप्तिशङ्कावकाशः। यद्वा भ्रान्तेरपि साक्षिणा विषयीकरणेन विषयगतप्रत्यक्षत्वं तत्रापीष्टमेव।

शुक्तिरूप्ये प्रत्यक्षत्वस्य विचार

प्रत्यक्षप्रमाणनिरूपणे भ्रमप्रमासाधारणप्रत्यक्षत्वसामान्यनिर्वचनमनुपपन्नं मत्वाऽऽह - "यदा तु प्रत्यक्षप्रमाया एव लक्षणं वक्तव्यं तदापूर्वोक्तलक्षणेऽबाधितत्वं विषयविशेषणं देयम्। शुक्तिरूप्यादिभ्रमस्य संसारकालीनबाधविषयप्रातिभासिकरजतादिविषयकत्वेनोक्तलक्षणाभावान्नाति॰ याप्तिः"।।

न खलु प्रत्यक्षप्रमालक्षणं तद्वति तत्प्रकारकत्वं अनधिगतार्थविषयकज्ञानत्वमात्रं वा अद्वैतिणा प्रोच्यते, येनापत्तिः केनाऽप्यापादिता स्यात्। किन्तु अनधिगताबाधितार्थविषयकज्ञानत्वं भ्रमस्थले रूप्योत्पादेऽपि तस्य बाधिततया, अबाधित्वाभावेन इदं रूप्यमिति भ्रमे अबाधितार्थविषयकज्ञानत्वाभावेन नातिव्याप्त्यवकाशः। नन्वबाधितत्वं पारमार्थिकत्वम्? उत सत्त्वमात्रम्? नाद्यः, घटादिज्ञानेऽव्याप्तेः। न द्वितीयः शुक्तिरूप्यादिज्ञानेऽतिव्याप्तेस्तादवस्थ्यादित्याशङ्क्य संसारदशायामबाधित्वं विवक्षितमित्याह - शुक्तीति वाक्येन। अयमाशयः - अनधिगताबाधितार्थविषयकज्ञानत्वं प्रमात्वमिति प्रमालक्षणे अबाधितत्वं नाधिगतत्वसामान्याभाववत्त्वम् अपि तु ब्रह्मज्ञानेतराबाध्यत्वरूपं संसारकालीनबाधाविषयत्वम्। शुक्तिरूप्यादेः ब्रह्मज्ञानेतरेण नेदं रजतमिति वृत्तिज्ञानेन बाधात् संसारकालीनबाधविषयत्वसत्त्वेन अबाधित्वाभावात् इदं रजतमिति भ्रमे अबाधितार्थविषयकत्वाभावेन अतिव्याप्तेर्नावसर इति।

अन्यथाख्यातिवादी शङ्कते

ननु विसंवादिप्रवृत्त्या भ्रान्तिज्ञानसिद्धावपि तस्य प्रातिभासिकतत्कालोत्पन्नरजतादिविषयकत्वे न प्रमाणम्, देशान्तरीयरजतस्य क्लृप्तस्यैव तद्विषयत्वसंभवादिति चेत्। यद्यपि विसंवादिप्रवृत्त्या भ्रान्तिज्ञानं सिद्ध्यति, तस्य च विषयं विनाऽनुपपत्तिस्तद्विषयं साधयति, तथाऽपि स विषयः प्रातिभासिकस्तत्कालोत्पन्न इत्यत्र नास्ति प्रमाणम्। यद्विषयकप्रवृत्तिस्तस्य लाभे तस्याः संवादित्वमलाभे तु विसंवादित्वं, तच्च भ्रान्तिजन्यप्रवृत्तेरित्यर्थः। एवं रूपेणास्तु सिद्धिर्भ्रान्तिज्ञानस्य। परन्तु प्रतीतिसमकालं व्यावहारिकेतर- रजतोत्पादकल्पनस्य का आवश्यकता? शुक्तौ जायमानमिदं रजतमिति ज्ञानं पूर्वावगतहट्टादिदेशस्थ रजतमेवावगाहताम् इति अन्यथा ख्यात्यैव निर्वाहे नाङ्गीकार्या खल्वनिर्वचनीयख्यातिरिति सरलार्थः उत्तरयति- न तस्यासन्निकृष्टतया प्रत्यक्षविषयत्वायोगात्। न च ज्ञानं तत्र प्रत्यासत्तिः, ज्ञानस्य प्रत्यासत्तित्वे तत एव वह्न्यादेः प्रत्यक्षत्वापत्तावनुमानाद्युच्छेदापत्तेः।।

प्रात्यक्षिकी विषयता सन्निकर्षव्याप्या भवति। व्यापकाभावे च कथमपि व्याप्यमुपस्थातुमुत्सहते। शुक्तौ यदा इदं रजतमिति विभ्रमो न तदेन्द्रियेण चक्षुषा सह संयोग-संयुक्त-तादात्म्यादिकः सन्निकर्षो देशान्तरवर्तिनो व्यावहारिक-रजतमितिप्रतीतिविषयतामासादयेत्? भवति च प्रतीतिः रजतस्य, इत्यगत्या प्रातिभासिकरजतोत्पादो ध्रुवमङ्गीकार्यः। ननु भ्रमस्थले रजतस्मरणात्मकसन्निकर्षबलात् हट्टस्थरजतभानं कथं न स्यात्? शङ्कामपनयति - ज्ञानस्य सन्निकर्षत्वं न स्वीकर्त्तुमर्हम्। ज्ञानस्य सन्निकर्षतायाम् अनुमानादीनां प्रामाण्याभावप्रसङ्गात्। तथा हि पर्वतो वह्निमानित्यनुमितिस्थले पर्वतदर्शनात् धूमदर्शनाद्वा वह्निविषयक-संस्कारोद्‌बोधे वह्निस्मरणस्य स्वाभाविकतया, तादृशस्मरणं सन्निकर्षीकृत्य वह्निप्रत्यक्षस्यैव चक्षुषा सम्भवात् अनुमानप्रमाणस्वीकारस्याप्रयोजनकत्वापातः। न केवलमनुमानस्यैव, एवं क्रमेण शब्दादीनामपि प्रमाणानाम्।

अनिर्वचनीयरजतोत्पत्ति

भ्रमस्थले रजताद्युत्पत्तिमाक्षिपति - ननु रजतोत्पादकानां रजतावयवानामभावे शुक्तौ कथं तवापि रजतमुत्पद्यते इति चेत्।

कपालाभ्यां घटः, तन्तुभिः पटः उत्पद्यते इति सार्वजनीनानुभवो न केनापि अन्यथयितुं शक्यः। तथा चावयविद्रव्यं प्रति अवयवद्रव्यस्योपादानत्वमवश्यं मन्तव्यम्। शुक्तिषु इदं रजतमिति भ्रमस्थले रजतसामान्याभावेन, अवयवभूतरजताभावेन अवयविभूतरजतोत्पादः कथं शक्यो वक्तुमिति।

समुत्तरयति -

उच्यते। न हि लोकसिद्धसामग्री प्रातिभासिकरजतोत्पादिका, किन्तु विलक्षणैव। तथा हि काचकामलादिदोषदूषितलोचनस्य पुरोवर्तिद्रव्यसंयोगादिदमाकाश चाकचिक्याकाश काचिदन्तःकरणवृत्ति-रुदति तस्यां च वृत्ताविदमवच्छिन्नं चैतन्यं प्रतिबिम्बिते। तत्र पूर्वोक्तरीत्या वृत्तेर्निगमनेनेदमवच्छिन्नं चैतन्यं वृत्त्यवच्छिन्नं चैतन्यं प्रमातृचैतन्यं चाभिन्नं भवति। ततश्च प्रमातृचैतन्याभिन्नविषयचैतन्यनिष्ठा शुक्तित्वप्रकारिकाऽविद्या चाकचिक्यादि सादृश्यसन्दर्शन समुद्‌बोधितरजतसंस्कारसध्रीचीना काचादिदोष- समवहिता रजतरूपार्थाकारेण रजतज्ञानाभासकारेण च परिणमते।

अयमाशयः आहरणादितत्तत्क्रियासमर्थवस्तुनिष्पादनाय या अपेक्ष्यते लोकैः सामग्री, नापेक्षिता सा प्रातीतिकाव्यावहारिकमायिकवस्तूत्पत्तौ, यतः औचित्यमावहदयमाक्षेपो यदवयवाभावे कथमवयव्युत्पत्तिरिति। अवयव्युत्पत्तौ अवयवप्रयोजनमस्माभिरप्यभ्युपगम्यते। किन्तु प्रातिभासिकं तु रजतं नावयवि यतस्तत्र भवेत्प्रयोजनमवयवस्य। किञ्च व्यावहारिकवस्तूत्पत्तौ अदृष्टद्वारा प्राणिविशेषस्यैव भवति निमित्तत्वं न तु सामान्येन सर्वेषां प्राणिनाम्। प्रातीतिकवस्तूत्पत्तौ तु सर्वेषां प्राणिनां निमित्तत्वयोग्यत्वमिति महद्वैलक्षण्यं व्यावहारिकप्रातीतिककार्ययोः सति चैवमुपादनवैलक्षण्यमपि स्वाभाविकमेवेति न व्यावहारिकोपादाना-वयवापेक्षा प्रातीतिकवस्तूत्पाविति। प्रातीतिकवस्तूत्पादप्रणाली उक्तम् "तथा हि" इत्यादिवाक्यैः। तथा च काचादिदोषः, रजतादिविषयकसमुद्‌बुद्धसंस्कारः, शुक्तित्वाद्यज्ञानमिति त्रितयमेव

ईश्वरेच्छादिसचिवं विलक्षणसामग्री, यया भवति खलु समुत्पत्तिः शुक्तिरजतादिभ्रान्तिज्ञानस्य तद्विषयशुक्तिरजतादेश्च इति। सामग्र्याम् अज्ञानं परिणाम्युपादानम्, शुक्त्यवच्छिन्नचैतन्यं वृत्त्यवच्छिन्नचैतन्यप्रमातृचैतन्याभ्यामभेदमुपगतम् आरोपाधिष्ठानोपादानम्, अन्यच्च प्रोक्तं सर्वनिमित्तभूतमित्यवगन्तव्यम्। अत्र रजतमित्युपलक्षणम्, तेन सर्वत्र भ्रान्तिज्ञानस्थले इयमेव रीतिरवगन्तव्या।

सन्दर्भ

1. न्यायसिद्धान्तमुक्तावली, श्रीविश्वनाथपञ्चाननभट्टाचार्यप्रणीता, व्या. डॉ. गजाननशास्त्री मुसलगाँवकर, चौखम्बासुरभारतीप्रकाशनम्, वाराणसी, 2011
2. ब्रह्मसूत्रशाङ्करभाष्यम्, श्रीजगद्गुरुश्रीमदाद्यशङ्कराचार्यप्रणीतम्, व्या. स्वामी सत्यानन्दसरस्वती, चौखम्बासंस्कृतप्रतिष्ठानम्, दिल्ली, 2021
3. वेदान्तपरिभाषा, श्रीमद्धर्मराजध्वरीन्द्रप्रणीता, व्या. प्रो. पारसनाथ द्विवेदी, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, 2014
4. श्वेताश्वतर-उपनिषद्, व्या. महेशानन्दगिरी, श्रीदक्षिणामूर्ति मठ प्रकाशन, मिश्रपोखरा, वाराणसी, 1975